**Section B**

**Forms of Kāvya-Literature. Unit: I /Forms of poetry: dṛśya, śravya, miśra, (campū)**

कवेरिदं कर्म इति विग्रहेण कविशब्दात् ष्यञ्-प्रत्यये काव्यशब्दस्य व्युत्पत्तिः। अथ किमिदं काव्यमिति प्रश्ने साहित्यदर्पणकारविश्वनाथेन उक्तम् '**वाक्यं रसात्मकं काव्यम्...**'[1] इति। अर्थात् रसयुक्तं वाक्यमेव काव्यमिति। तन्मते गुणालंकारादिः रसस्य एव पोषकः। एतत् संस्कृतकाव्यं प्राधान्येन भेदत्रये विभक्तम्। तद्यथा- दृश्यकाव्यम् श्रव्यकाव्यम् चम्पूकाव्यम् (मिश्रकाव्यम्) च इति।

**दृश्यकाव्यम्** – द्रष्टुं योग्यम् इति विग्रहे दृश्-धातोः उत्तरं 'ऋदुपधाच्चाक्लृपिचृतेः' (३/१/११०) इति पाणिनिकृतसूत्रेण क्यप्-प्रत्यये कृते दृश्यशब्दस्य निष्पत्तिः। अथवा दृश्यस्य भावः इति विग्रहे दृश्-धातोः 'अचो यत्' (३/१/९७) इति सूत्रेण अच्-प्रत्यये कृतेऽपि दृश्यशब्दस्य व्युत्पत्तिः। अर्थात् दर्शनीयप्रधानम् काव्यं भवति दृश्यकाव्यम्। विश्वनाथेन उच्यते '**दृश्यं तत्राभिनेयम्**' इति। अत्र अभिनयः एकः मुख्यविषयः। नाट्यकारः अभिनेता दर्शकः इत्येतेषां त्रयाणां सहृदयमानसिकतायाः उपरि दृश्यकाव्यस्य साफल्यं निर्भरति। नटे कस्यापि चरित्रस्य रूपः आरोपहेतोः दृश्यकाव्यस्य अपरं नाम रूपकमिति।

**श्रव्यकाव्यम्** - श्रोतुं योग्यम् इति विग्रहे श्रु-धातोः उत्तरं 'ऋदुपधाच्चाक्लृपिचृतेः' (३/१/११०) इति पाणिनिकृतसूत्रेण क्यप्-प्रत्यये कृते श्रव्यशब्दस्य निष्पत्तिः। अथवा श्रव्यस्य भावः इति विग्रहे श्रु -धातोः 'अचो यत्' (३/१/९७) इति सूत्रेण

[1] साहित्यदर्पणः २यः परि. 1मः का.

अच्-प्रत्यये कृतेऽपि श्रव्यशब्दस्य व्युत्पत्तिः। अर्थात् श्रोतव्यमात्रम् भवति श्रव्यकाव्यम्। साहित्यदर्पणग्रन्थे श्रव्यकाव्यस्य लक्ष्यणं प्रतिपादयता कविराजविश्वनाथेन उक्तम् **'श्रव्यं श्रोतव्यमात्रम्'** इति। अतः केवलश्रवणयोग्यं भवति श्रव्यकाव्यम्। मात्रपदेन द्रष्टव्यस्य व्यवच्छेदः। एतत् पुनः गद्यपद्यभेदेन द्विविधम्। पद्यस्य लक्षणे विश्वनाथेनोक्तम् - **'छन्दोवद्धपदं पद्यम्'** इति। अर्थात् अनुष्टुभादिछन्देन विरचितं पादसमन्वितं वाक्यं भवति पद्यम। पद्यम् पुनः मुक्तक-युग्मक-सांदानतिक-कलापक-कूलकभेदेन पञ्चविधम्। ततः गद्यस्य लक्षणे उक्तम् - **'वृत्तगन्धोज्झितं गद्यम्'** इति। अर्थात् वृत्तबन्धेन पद्यबन्धेन उज्झितं त्यक्तं श्रव्यकाव्यम् गद्यमिति। गद्यम् पुनः मुक्तक-वृत्तगन्धि-उत्कलिकाप्राय-चूर्णकभेदेन चतुर्विधम्।

**चम्पूकाव्यम्** (मिश्रकाव्यम् वा) – साहित्यदर्पणग्रन्थे चम्पूकाव्यस्य लक्षणं प्रतिपादयता कविराजविश्वनाथेन उक्तम् **'गद्यपद्यमयं काव्यचम्पूरित्यभिधीयते'** इति। अर्थात् यस्मिन् काव्ये गद्यांशेन सह पद्यांशमपि दृश्यते तदेव चम्पूकाव्यम् इति कथ्यते। यथा सिंहादित्यस्य नलचम्पूकाव्यमिति।